# Gayatryatharvashirsham

# ગાયત્ર્યથર્વશીર્ષમ્

## Document Information

Text title : Gayatri Atharvashirsham

File name : gAyatryatharvashIrSham.itx

Category : atharvashIrSha, devii, gAyatrI, devI

Location : doc_devii

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 226-425

Latest update : June 2, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 13, 2022

*sanskritdocuments.org*

# ગાયત્ર્યથર્વશીર્ષમ્

શ્રીગણેશાય નમઃ ॥

નમસ્કૃત્ય ભગવાન્ યાજ્ઞવલ્ક્યઃ સ્વયં પરિપૃચ્છતિ
ત્વં બ્રૂહિ ભગવન્ ગાયત્ર્યા ઉત્પત્તિં શ્રોતુમિચ્છામિ ॥ ૧॥

બ્રહ્મોવાચ ।
પ્રણવેન વ્યાહૃતયઃ પ્રવર્તન્તે તમસસ્તુ પરં જ્યોતિષ્કઃ પુરુષઃ સ્વયમ્ ।
ભૂર્વિષ્ણુરિતિ હ તાઃ સાઙ્ગુલ્યા મથેત્ ॥ ૨॥

મથ્યમાનાત્ફેનો ભવતિ ફેનાદ્બુદ્બુદો ભવતિ બુદ્બુદાદણ્ડં ભવતિ
અણ્ડવાનાત્મા ભવતિ આત્મન આકાશો ભવતિ આકાશાદ્વાયુર્ભવતિ
વાયોરગ્નિર્ભવતિ અગ્નેરોઙ્કારો ભવતિ ઓઙ્કારાદ્વ્યાહૃતિર્ભવતિ
વ્યાહૃત્યા ગાયત્રી ભવતિ ગાયત્ર્યાઃ સાવિત્રી ભવતિ સાવિત્ર્યાઃ
સરસ્વતી ભવતિ સરસ્વત્યા વેદા ભવન્તિ વેદેભ્યો બ્રહ્મા ભવતિ
બ્રહ્મણો લોકા ભવન્તિ તસ્માલ્લોકાઃ પ્રવર્તન્તે ચત્વારો વેદાઃ સાઙ્ગાઃ
સોપનિષદઃ સેતિહાસાસ્તે સર્વે ગાયત્ર્યાઃ પ્રવર્તન્તે યથાઽગ્નિર્દેવાનાં
બ્રાહ્મણો મનુષ્યાણાં મેરુઃ શિખરિણાં ગઙ્ગા નદીનાં વસન્ત ઋતૂનાં
બ્રહ્મા પ્રજાપતીનામેવાસૌ મુખ્યો ગાયત્ર્યા ગાયત્રી છન્દો ભવતિ ॥ ૩॥

કિં ભૂઃ કિં ભુવઃ કિં સ્વઃ કિં મહઃ કિં જનઃ કિં તપઃ કિં સત્યં
કિં તત્ કિં સવિતુઃ કિં વરેણ્યં કિં ભર્ગઃ કિં દેવસ્ય કિં ધીમહિ
કિં ધિયઃ કિં યઃ કિં નઃ કિં પ્રચોદયાત્ ॥ ૪॥

ભૂરિતિ ભૂર્લોકઃ ભુવ ઇત્યન્તરિક્ષલોકઃ ।
સ્વરિતિ સ્વર્લોકો મહ ઇતિ મહર્લોકો જન ઇતિ જનો લોકસ્તપ
ઇતિ તપોલોકઃ સત્યમિતિ સત્યલોકઃ ।
ભૂર્ભુવઃસ્વરોમિતિ ત્રૈલોક્યમ્ ॥ ૫॥

તદસૌ તેજો યત્તેજસોઽગ્નિર્દેવતા સવિતુરિત્યાદિત્યસ્ય વરેણ્યમિત્યન્નમ્ ।

અન્નમેવ પ્રજાપતિર્ભર્ગ ઇત્યાપઃ ।
આપો વૈ ભર્ગ એતાવત્સર્વા દેવતા દેવસ્યેન્દ્રો વૈ દેવયદ્દિવં
તદિન્દ્રસ્તસ્માત્સર્વકૃત્ પુરુષો નામ વિષ્ણુઃ ॥ ૬॥

ધીમહિ કિમધ્યાત્મં તત્પરમં પદમિત્યધ્યાત્મં યો ન ઇતિ પૃથિવી વૈ
યો નઃ પ્રચોદયાત્ કામ ઇમાઁલ્લોકાન્ પ્રચ્યાવયન્ યો નૃશંસ્યોઽસ્તો-
ષ્યસ્તત્પરમો ધર્મ ઇત્યેષા ગાયત્રી કિઙ્ગોત્રા કત્યક્ષરા કતિપદા
કતિકુક્ષિઃ કતિશીર્ષા ચ ॥ ૭॥

સાઙ્ખ્યાયનસગોત્રા ગાયત્રી ચતુર્વિંશત્યક્ષરા ત્રિપદા
ષટ્કુક્ષિઃ સાવિત્રી કશાસ્ત્રયઃ પાદા ભવન્તિ ॥ ૮॥

કાઽસ્યાઃ કુક્ષિઃ કાનિ પઞ્ચ શીર્ષાણિ ।
ઋગ્વેદોઽસ્યાઃ પ્રથમઃ પાદો ભવતિ યજુર્વેદો દ્વિતીયઃ
સામવેદસ્તૃતીયઃ પૂર્વા દિક્ પ્રથમા કુક્ષિર્ભવતિ દક્ષિણા દ્વિતીયા
પશ્ચિમા તૃતીયા ઉદીચી ચતુર્થા ઊર્ધ્વા પઞ્ચમી અધરા ષષ્ઠી
કુક્ષિઃ । વ્યાકરણમસ્યાઃ પ્રથમં શીર્ષં ભવતિ શિક્ષા દ્વિતીયં
કલ્પસ્તૃતીયં નિરુક્તઃ જ્યોતિષામયનં પઞ્ચમમ્ ॥ ૯॥

કિં લક્ષણં કિમુ ચેષ્ટિતં કિમુદાહૃતં કિમક્ષરં દૈવત્યમ્ ॥ ૧૦॥

લક્ષણં મીમાંસા અથર્વવેદો વિચેષ્ટિતમ્ ।
છન્દોવિધિરિત્યુદાહૃતમ્ ॥ ૧૧॥

કો વર્ણઃ કઃ સ્વરઃ ।
શ્વેતો વર્ણઃ ષટ્ સ્વરાણિ ઇમાન્યક્ષરાણિ દૈવતાનિ ભવન્તિ
પૂર્વા ભવતિ ગાયત્રી મધ્યમા સાવિત્રી પશ્ચિમા સન્ધ્યા સરસ્વતી ॥ ૧૨॥

પ્રાતઃ સન્ધ્યા રક્તા રક્તપદ્માસનસ્થા રક્તામ્બરધરા
રક્તવર્ણા રક્તગન્ધાનુલેપના ચતુર્મુખા અષ્ટભુજા દ્વિનેત્રા
દણ્ડાક્ષમાલાકમણ્ડલુસ્રુક્સ્રુવધારિણી સર્વાભરણભૂષિતા કૌમારી
બ્રાહ્મી હંસવાહિની ઋગ્વેદસંહિતા બ્રહ્મદૈવત્યા ત્રિપદા ગાયત્રી
ષટ્કુક્ષિઃ પઞ્ચશીર્ષા અગ્નિમુખા રુદ્રશિવવિષ્ણુહૃદયા
બ્રહ્મકવચા સાઙ્ખ્યાયનસગોત્રા ભૂર્લોકવ્યાપિની અગ્નિસ્તત્ત્વં
ઉદાત્તાનુદાત્તસ્વરિતસ્વરમકાર આત્મજ્ઞાને વિનિયોગઃ ।
ઇત્યેષા ગાયત્રી ॥ ૧૩॥

મધ્યાહ્નસન્ધ્યા શ્વેતા શ્વેતપદ્માસનસ્થા શ્વેતામ્બરધરા
શ્વેતગન્ધાનુલેપના પઞ્ચમુખી દશભુજા ત્રિનેત્રા શૂલાક્ષમાલા
કમણ્ડલુકપાલધારિણી સર્વાભરણભૂષિતા સાવિત્રી યુવતી માહેશ્વરી
વૃષભવાહિની યજુર્વેદસંહિતા રુદ્રદૈવત્યા ત્રિપદા સાવિત્રી ષટ્કુક્ષિઃ
પઞ્ચશીર્ષા અગ્નિમુખા રુદ્રશિખા બ્રહ્મકવચા ભારદ્વાજસગોત્રા
ભુવર્લોકવ્યાપિની વાયુસ્તત્ત્વં ઉદાત્તાનુદાત્તસ્વરિતસ્વરમકારઃ
શ્વેતવર્ણ આત્મજ્ઞાને વિનિયોગઃ । ઇત્યેષા સાવિત્રી ॥ ૧૪॥

સાયંસન્ધ્યા કૃષ્ણા કૃષ્ણપદ્માસનસ્થા કૃષ્ણામ્બરધરા
કૃષ્ણવર્ણા કૃષ્ણગન્ધાનુલેપના કૃષ્ણમાલ્યામ્બરધરા
એકમુખી ચતુર્ભુજા દ્વિનેત્રા શઙ્ખચક્રગદાપદ્મધારિણી
સર્વાભરણભૂષિતા સરસ્વતી વૃદ્ધા વૈષ્ણવી ગરુડવાહિની
સામવેદસંહિતા વિષ્ણુદૈવત્યા ત્રિપદા ષટ્કુક્ષિઃ પઞ્ચશીર્ષા
અગ્નિમુખા વિષ્ણુહૃદયા રુદ્રશિખા બ્રહ્મકવચા કાશ્યપસગોત્રા
સ્વર્લોકવ્યાપિની સૂર્યસ્તત્ત્વમુદાત્તાનુદાત્તસ્વરિતમકારઃ કૃષ્ણવર્ણો
મોક્ષજ્ઞાને વિનિયોગઃ । ઇત્યેષા સરસ્વતી ॥ ૧૫॥

રક્તા ગાયત્રી શ્વેતા સાવિત્રી કૃષ્ણવર્ણા સરસ્વતી ।
પ્રણવો નિત્યયુક્તશ્ચ વ્યાહૃતીષુ ચ સપ્તસુ ॥ ૧૬॥

સર્વેષામેવ પાપાનાં સઙ્કરે સમુપસ્થિતે ।
દશ શતં સમભ્યર્ચ્ય ગાયત્રી પાવની મહત્ ॥ ૧૭॥

પ્રહ્રાદોઽત્રિર્વસિષ્ઠશ્ચ શુકઃ કણ્વઃ પરાશરઃ ।
વિશ્વામિત્રો મહાતેજાઃ કપિલઃ શૌનકો મહાન્ ॥ ૧૮॥

યાજ્ઞવલ્ક્યો ભરદ્વાજો જમદગ્નિસ્તપોનિધિઃ ।
ગૌતમો મુદ્ગલઃ શ્રેષ્ઠો વેદવ્યાસશ્ચ લોમશઃ ॥ ૧૯॥

અગસ્ત્યઃ કૌશિકો વત્સઃ પુલસ્ત્યો માણ્ડુકસ્તથા ।
દુર્વાસાસ્તપસા શ્રેષ્ઠો નારદઃ કશ્યપસ્તથા ॥ ૨૦॥

ઉક્તાત્યુક્તા તથા મધ્યા પ્રતિષ્ઠાન્યાસુ પૂર્વિકા ।
ગાયત્ર્યુષ્ણિગનુષ્ટુપ્ ચ બૃહતી પઙ્ક્તિરેવ ચ ॥ ૨૧॥

ત્રિષ્ટુપ્ ચ જગતી ચૈવ તથાતિજગતી મતા ।
શક્વરી સાતિપૂર્વા યાદષ્ટ્યત્યષ્ટી તથૈવ ચ ।

ધૃતિશ્ચાતિધૃતિશ્ચૈવ પ્રકૃતિઃ કૃતિરાકૃતિઃ ॥ ૨૨॥

વિકૃતિઃ સઙ્કૃતિશ્ચૈવ તથાતિકૃતિરુત્કૃતિઃ ।
ઇત્યેતાશ્છન્દસાં સંજ્ઞાઃ ક્રમશો વચ્મિ સામ્પ્રતમ્ ॥ ૨૩॥

ભૂરિતિ છેન્દો ભુવ ઇતિ છન્દઃ સ્વરિતિ છન્દો
ભૂર્ભુવઃસ્વરોમિતિ દેવી ગાયત્રી ઇત્યેતાનિ છન્દાંસિ પ્રથમમાગ્નેયં
દ્વિતીયં પ્રાજાપત્યં તૃતીયં સૌમ્યં ચતુર્થમૈશાનં
પઞ્ચમમાદિત્યં ષષ્ઠં બાર્હસ્પત્યં સપ્તમં પિતૃદૈવત્યમષ્ટમં
ભગદૈવત્યં નવમમાર્યમં દશમં સાવિત્રમેકાદશં ત્વાષ્ટ્રં
દ્વાદશં પૌષ્ણં ત્રયોદશમૈન્દ્રાગ્નં ચતુર્દશં વાયવ્યં પઞ્ચદશં
વામદૈવત્યં ષોડશં મૈત્રાવરુણં સપ્તદશમાઙ્ગિરસમષ્ટાદશં
વૈશ્વદેવ્યમેકોનવિંશં વૈષ્ણવં વિંશં વાસવમેકવિંશં રૌદ્રં
દ્વાવિંશમાશ્વિનં ત્રયોવિંશં બ્રાહ્મં ચતુર્વિંશં સાવિત્રમ્ ॥ ૨૪॥

દીર્ઘાન્સ્વરેણ સંયુક્તાન્ બિન્દુનાદસમન્વિતાન્ ।
વ્યાપકાન્વિન્યસેત્પશ્ચાદ્શપઙ્ક્ત્યક્ષરાણિ ચ ।
દ્રવુપુંસ ઇતિ પ્રત્યક્ષબીજાનિ ।
પ્રહ્લાદિની પ્રભા સત્યા વિશ્વા ભદ્રા વિલાસિની ।
પ્રભાવતી જયા કાન્તા શાન્તા પદ્મા સરસ્વતી ॥ ૨૫॥

વિદ્રુમસ્ફટિકાકારં પદ્મરાગસમપ્રભમ્ ।
ઇન્દ્રનીલમણિપ્રખ્યં મૌક્તિકં કુઙ્કુમપ્રભમ્ ॥ ૨૬॥

અઞ્જનાભં ચ ગાઙ્ગેયં વૈડૂર્યં ચન્દ્રસન્નિભમ્ ।
હારિદ્રં કૃષ્ણદુગ્ધાભં રવિકાન્તિસમં ભવમ્ ॥ ૨૭॥

શુકપિચ્છસમાકારં ક્રમેણ પરિકલ્પયેત્ ।
પૃથિવ્યાપસ્તથા તેજો વાયુરાકાશ એવ ચ ॥ ૨૮॥

ગન્ધો રસશ્ચ રૂપં ચ શબ્દઃ સ્પર્શસ્તથૈવ ચ ॥ ૨૯॥

ઘ્રાણં જિહ્વા ચ ચક્ષુશ્ચ ત્વક્ શ્રોત્રં ચ તથાપરમ્ ।
ઉપસ્થપાયુપાદાદિ પાણિર્વાગપિ ચ ક્રમાત્ ॥ ૩૦॥

મનો બુદ્ધિરહઙ્કારમવ્યક્તં ચ યથાક્રમમ્ ।
સુમુખં સમ્પુટં ચૈવ વિતતં વિસ્તૃતં તથા ।
એકમુખં ચ દ્વિમુખં ત્રિમુખં ચ ચતુર્મુખમ્ ॥ ૩૧॥

પઞ્ચમુખં ષણમુખં ચાધોમુખં ચૈવ વ્યાપકમ્ ।
અઞ્જલીકં તતઃ પ્રોક્તં મુદ્રિતં તુ ત્રયોદશમ્ ॥ ૩૨॥

શકટં યમપાશં ચ ગ્રથિતં સમ્મુખોન્મુખમ્ ।
પ્રલમ્બં મુષ્ટિકં ચૈવ મત્સ્યઃ કૂર્મો વરાહકમ્ ॥ ૩૩॥

સિંહાક્રાન્તં મહાક્રાન્તં મુદ્ગરં પલ્લવં તથા ।
એતા મુદ્રાશ્ચતુર્વિંશદ્ગાયત્ર્યાઃ સુપ્રતિષ્ઠિતાઃ ॥ ૩૪॥

ૐ મૂર્ધ્નિ સઙ્ધાતે બ્રહ્મા વિષ્ણુર્લલાટે રુદ્રો ભ્રૂમધ્યે
ચક્ષુશ્ચન્દ્રાદિત્યૌ કર્ણયોઃ શુક્રબૃહસ્પતી નાસિકે વાયુદૈવત્યં
પ્રભાતં દોષા ઉભે સન્ધ્યે મુખમગ્નિર્જિહ્વા સરસ્વતી ગ્રીવા સ્વાધ્યાયાઃ
સ્તનયોર્વસવો બાહ્વોર્મરુતઃ હૃદયં પર્જન્યમાકાશમપરં
નાભિરન્તરિક્ષં કટિરિન્દ્રિયાણિ જઘનં પ્રાજાપત્યં કૈલાસમલયૌ
ઊરૂ વિશ્વેદેવા જાનુભ્યાં જાન્વોઃ કુશિકૌ જઙ્ઘયોરયનદ્વયં સુરાઃ
પિતરઃ પાદૌ પૃથિવી વનસ્પતિર્ગુલ્ફૌ રોમાણિ મુહૂર્તાસ્તે વિગ્રહાઃ
કેતુમાસા ઋતવઃ સન્ધ્યાકાલત્રયમાચ્છાદનં સંવત્સરો નિમિષઃ
અહોરાત્રાવાદિત્યચન્દ્રમસૌ સહસ્રપરમાં દેવીં શતમધ્યાં
દશાપરામ્ । સહસ્રનેત્રીં દેવીં ગાયત્રીં શરણમહં પ્રપદ્યે ॥ ૩૫॥

તત્સવિતુર્વરદાય નમઃ તત્પ્રાતરાદિત્યાય નમઃ ।
સાયમધીયાનો દિવસકૃતં પાપં નાશયતિ ॥ ૩૬॥

પ્રાતરધીયાનો રાત્રિકૃતં પાપં નાશયતિ ।
તત્સાયમ્પ્રાતઃ પ્રયુઞ્જાનોઽપાપો ભવતિ ।
ય ઇદં ગાયત્ર્યથર્વશીર્ષં બ્રાહ્મણઃ પ્રયતઃ પઠેત્ ।
ચત્વારો વેદા અધીતા ભવન્તિ ।
સર્વેષુ તીર્થેષુ સ્નાતો ભવતિ સર્વૈર્દેવૈર્જ્ઞાતો ભવતિ ।
સર્વપ્રત્યૂહાત્પૂતો ભવતિ ॥ ૩૭॥

અપેયપાનાત્પૂતો ભવતિ ॥ ૩૮॥

અભક્ષ્યભક્ષણાત્પૂતો ભવતિ ।
અલેહ્યલેહનાત્પૂતો ભવતિ ।
અચોષ્યચોષણાત્પૂતો ભવતિ ।
સુરાપાનાત્પૂતો ભવતિ ॥ ૩૯॥

સુવર્ણસ્તેયાત્પૂતો ભવતિ ।
પઙ્ક્તિભેદનાત્પૂતો ભવતિ ।
પતિતસમ્ભાષણાત્પૂતો ભવતિ ।
અનૃતવચનાત્પૂતો ભવતિ ।
ગુરુતલ્પગમનાત્પૂતો ભવતિ ।
અગમ્યાગમનાત્પૂતો ભવતિ ।
વૃષલીગમનાત્પૂતો ભવતિ ॥ ૪૦॥

બ્રહ્મહત્યાયાઃ પૂતો ભવતિ ।
ભ્રૂણહત્યાયાઃ પૂતો ભવતિ ।
વીરહત્યાયાઃ પૂતો ભવતિ ।
અબ્રહ્મચારી સુબ્રહ્મચારી ભવતિ ॥ ૪૧॥

અનેનાથર્વશીર્ષેણાધીતેન ક્રતુશતેનેષ્ટં ભવતિ ।
ષષ્ટિસહસ્રં ગાયત્રી જપ્તા ભવતિ ।
અષ્ટૌ બ્રાહ્મણાન્ ગ્રાહયેદર્થસિદ્ધિર્ભવતિ ।
ય ઇદં ગાયત્ર્યથર્વશીર્ષં બ્રાહ્મણઃ પ્રયતઃ પઠેત્ ।
સ સર્વપાપૈઃ પ્રમુચ્યતે બ્રહ્મલોકે મહીયતે બ્રહ્મલોકે મહીયતે ॥ ૪૨॥

ઇતિ ગાયત્ર્યથર્વશીર્ષં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

---

*Gayatryatharvashirsham*

pdf was typeset on October 13, 2022

Please send corrections to *sanskrit@cheerful.com*